www.thearyasamaj.org

जनवरी, २०१२ ईसवीयाब्दः ॥ ओ३म् ॥ R.N.I. Regd. No. UPBIL/1998/1485

ज्वालापुरीय - गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

❀ 'भारते भातु भारती' ❀

❀ नेता सदा विजयते सुकृती सुभाषः ❀

-डॉ. प्रशस्यमित्रशास्त्री
२९, आनन्दनगरम् (जेल रोड)
रायबरेली (उ.प्र.)

(१)

गौराङ्ग-शासन-समापन-बद्ध-बुद्धिः,
सर्वात्मना निज-पराक्रम-सिद्ध-सिद्धिः।
स्वाधीनता-कुसुम-सौरभ-सान्द्रवासः,
नेता सदा विजयते सुकृती-सुभाषः॥

(२)

हुङ्कार-कम्पित-विदेशि-कुशासनोऽसौ,
क्रान्ति-प्रसार-सुसमर्पित-सर्वकायः।
सर्वाधिकार-निज-गौरव-साऽभिलाषः
नेता सदा विजयते सुकृती-सुभाषः॥

(३)

आजाद-हिन्द-पृतना-परिवार-पूरः,
स्वातन्त्र्य-युद्ध-हुत-सर्वधनः स वीरः।
अङ्ग्रेज-सैन्य-समभीप्सित-सर्वनाशः,
नेता सदा विजयते सुकृती-सुभाषः॥

(४)

गाँधी-प्रसिद्ध-नेहरु-परिवार-कीर्तिम्,
संस्मारयन्ति यदि तैः समुपेक्षितो यः।
स्वाधीन-भारत-समृद्धि-सदाऽभिलाषः,
नेता सदा विजयते सुकृती-सुभाषः॥

(५)

प्रश्नाः -

देशं हि सन्दिशति कः ?, वद शिक्षितः कः ?,
को दीप्यते च निशि ?, कः कथितोऽष्टसंख्यः।
को विद्यते भगवतश्च विशेषभावः ?,

उत्तराणि-

नेता सुभाष-चन्द्रो वसुरद्वितीयः ॥

www.thearyasamaj.org

दूरभाषः- ०१३३४-२५४२९५, २५५३७७ (ज्वालापुरम्) तारगृहम्- महाविद्यालयः (ज्वालापुरम्)

भारतोदयः

संस्कृत-मासिकपत्रम्

वर्षम्-१०२ अङ्कः-७

सम्पादकः
डॉ. हरिगोपालशास्त्री
व्याकरणाचार्यः
एम.ए., पी-एच.डी.
राष्ट्रपति-पुरस्कृतः

सह-सम्पादकः
डॉ. केशवप्रसाद उपाध्यायः
साहित्याचार्यः
एम.ए., पी-एच.डी.

प्रबन्ध-सम्पादकः
डॉ. अजयकौशिकः
साहित्याचार्यः
एम.ए., पी-एच.डी.

प्रकाशकः
गुरुकुलमहाविद्यालयो ज्वालापुरम्
हरिद्वारम्- २४९४०४
(उत्तराखण्ड-प्रदेशः)

शुल्क-विवरणम्
प्रत्यङ्कम्- ५/-
वार्षिकम्- ५०/-
आजीवनम्- ५००/-

विषयानुक्रमणिका

१. श्रुति-सुधा	-महर्षिदयानन्दसरस्वती	३
२. भास-नाटक-चक्रम्	-पद्मश्री डॉ. कपिलदेवद्विवेदी,	४
३. प्रसरतु संस्कृत-भाषा	-डॉ. अनन्तराममिश्रः 'अनन्तः'	७
३. उपासनायाः वैदिकं स्वरूपम्(२)	-डॉ. रजनी आत्रेयः	८
४. भगवत्प्रार्थना	-............................	११
५. आवश्यकताऽऽविष्काराणां जननी भवति	-डॉ. केशवप्रसाद उपाध्यायः	१२
६. अभ्यर्थना-	-............................	१३
७. वर्तमानयुगे गुरुकुलशिक्षाप्रणाल्याः प्रासङ्गिकता	-डॉ. हरिगोपालः शास्त्री	१४
८. ऋषिदयानन्दः	-आचार्यसन्दीपकुमारत्यागी 'दीपः'	१५
९. दिल्ली-नगरे पञ्चदशं विश्वसंस्कृत-सम्मेलनं समायोजितम्	-डॉ. प्रकाशचन्द्रपन्तः, संवाददाता	१६
१०. वेद-विद्यास्तवः	-..........................	१८
११. महाविद्यालय-समाचाराः	-..........................	१९
१२. भारत-वन्दना	-..........................	२०

राष्ट्रियसंस्कृतसंस्थानस्य अनुदानसाहाय्येन प्रकाशितम्

भारतोदयः(संस्कृत-मासिकम्)

(RNI Regd. No. UPBIL/1998/1485)

१. प्रकाशनस्थानम्	ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डम्)
२. प्रकाशनकालावधिः	मासिकम्
३. सङ्केतेन सह मुद्रकस्य प्रकाशकस्य, सम्पादकस्य नाम, नागरिकता च	डा. हरिगोपालशास्त्री, भारतीयः गुरुकुलमहाविद्यालयः, ज्वालापुरम् हरिद्वारम्- २४९४०४ (उत्तराखण्डम्)
४. पत्राधिकारिणां नाम्ना सह सङ्केतः	ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभा, ज्वालापुरम्, हरिद्वारम्- २४९४०४ (उत्तराखण्डम्)

डा. हरिगोपालशास्त्री इति नामाहं समुद्घोषायामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

डा. हरिगोपालशास्त्री

www.thearyasamaj.org

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

भाविक-भरित-भारतोदयोऽयं भव-विभवोद्भव-भावनाभिलाषी ।
भगवति भुवि भक्ति-भाव-भाजां भव-भय-भाव-भरं भ्रियान्नभूमन् ॥

× × ×

निशम्यतां लेख-ललाम-सञ्चय-प्रकाशने येन कृतोऽतिनिश्चयः ।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः' ॥

वर्षम्- १०२	माघ २०६८ विक्रमाब्दः ❋ जनवरी २०१२ ईस्वीयाब्दः	अङ्कः- ७

❋ श्रुति-सुधा ❋

ओ३म् यो अश्वानां यो गवां गोपतिर्वशी य आरितः कर्मणि कर्मणि स्थिरः।
वीलोश्चिदिन्द्रो यो असुन्वतो वधो मरुत्वन्तं सख्याय हवामहे ॥

-ऋग्वेदः १।१०१।४

पदार्थः-

(यः) सभाध्यक्षः। **(अश्वानाम्)** तुरङ्गानाम्। **(यः गवाम्)** गवां पृथिव्यादीनां वा। **(गोपतिः)** गवां स्वेषामिन्द्रियाणां स्वामी। **(वशी)** वशं कर्तुं शीलः। **(यः)** **(आरितः)** सभया विज्ञापितः। **(कर्मणि कर्मणि)** क्रियायां क्रियायाम्। **(स्थिरः)** निश्चल-प्रवृत्तिः। **(वीलोः)** बलवतः। **(चित्)** इव। **(इन्द्रः)** दुष्टानां। **(यः)** यज्ञकर्तृ-विरोधिनः। **(वधः)** वज्र इव। '**वध इति वज्रनामसु पठितम्**। निघं. २।२०।' **(मरुत्वन्तम्)** प्रशस्ता मरुतो विद्यावन्त ऋत्विजोऽध्यापका विद्यन्ते यस्मिन्, तम्। **(सख्याय)** सख्युः कर्मणे भावाय वा। **(हवामहे)** स्वीकुर्महे॥४॥ **अत्र वाचक-लुप्तोपमालङ्कारः।**

भावार्थः-

मनुष्यैर्यः सर्वपालको जितेन्द्रियः शान्तो, यत्र-यत्र सभयाऽऽज्ञापितस्तस्मिंस्तस्मिन्नेव कर्मणि स्थिरबुद्ध्या प्रवर्त्तमानो, दुष्टानां बलवतां शत्रूणां विजय-कर्त्ता वर्त्तते, तेन सह सततं मित्रतां संभाव्य सुखानि सदा भोक्तव्यानि ॥४॥

-महर्षिदयानन्दसरस्वती

-ऋग्वेदभाष्यम्, तृतीयो भागः, ५३७ पृष्ठे

www.thearyasamaj.org

❋भास-नाटक-चक्रम्❋

-पद्मश्री डॉ. कपिलदेवद्विवेदी, पूर्वनिदेशकः
विश्वभारती-अनुसन्धान-परिषद्, ज्ञानपुरम्
भदोही(उ.प्र.)

भासो हासः सरस्वत्या नाटकैरमृतोपमैः।
नाट्य-वाङ्मय-व्योमेन्दुः शास्त्रज्योतिर्विभास्वरः॥
-कपिलस्य

भासस्य नाट्यकृतित्वम्-

महाकवेर्भासस्य कृतित्वेन त्रयोदश-नाटक-रत्नानि समुपलभ्यन्ते।

भास-नाटक-चक्रेऽपि छेकैः क्षिप्ते परीक्षितुम्।
स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः॥

इति राजशेखर-भणितम् आश्रित्य '**भास-नाटक-चक्रम्**' इति तत्कृत-नाटकानां नाम व्यवह्रियते। नाट्य-त्रयोदशस्य परिचयः समासतोऽत्र प्रस्तूयते।

(१) प्रतिज्ञा-यौगन्धरायणम् -

अङ्कचतुष्टयमत्र। उदयनस्य वासवदत्तया सह प्रणयः परिणयश्चेह वर्ण्येते।

(२) स्वप्नवासवदत्तम् -

अङ्कषट्कमत्र। वासवदत्ताऽग्निदाहेन दग्धेति प्रवादं प्राचार्ययौगन्धरायण-प्रयत्नात् पद्मावत्या सहोदयनस्योपयमोऽपहृतराज्यावाप्तिश्च वर्ण्येते।

(३) ऊरुभङ्गम् -

नाटकमेतद् **एकाङ्कि**। पाञ्चालीपरिभव-प्रतिक्रियार्थं भीमेन गदा-युद्धे दुर्योधनोरु-भञ्जनं वस्तु वर्ण्यते।

(४) दूतवाक्यम्-

एकाङ्कि-नाटकम्। महाभारतात् प्राक् पाण्डवार्थं दुर्योधन-संसदि श्रीकृष्णस्य दूतत्वेन गमनं प्रयत्न-वैफल्यं चात्र वर्ण्यते।

(५) पञ्चरात्रम्-

अङ्कत्रयमत्र। यज्ञान्ते द्रोणो दक्षिणा-स्वरूपं पाण्डवेभ्यो राज्यार्थं ययाचे दुर्योधनम्। पञ्चरात्राभ्यान्तरे पाण्डवानाम् उदन्त उपलभ्यते चेत् राज्यार्धं दास्यते मयेति दुर्योधनोक्तिः। पञ्चरात्राभ्यन्तरे पाण्डवानां प्राप्तिः, दुर्योधनकृतराज्यार्धप्रदानं च।

(६) बालचरितम्-

अङ्कपञ्चकमत्र। बालस्य श्रीकृष्णस्य जन्मन आरभ्य कंस-वधान्तं चरितमिह वण्यते।

(७) दूतघटोत्कचम्-

एकाङ्कि-नाटकमदः। अभिमन्यु-निधनानन्तरं श्रीकृष्ण-प्रेरणया दौत्यमाश्रित्य घटोत्कचस्य धृतराष्ट्रान्तिकं गमनम्। दुर्योधन-कृतस्तस्यावमानः। दुर्योधनोक्तिश्च- '**प्रतिवचो दास्यामि ते सायकैः।**' इति।

(८) कर्णभारम्

नाटकमिदम् एकाङ्कि। ब्राह्मण-वेष-धारिणे शक्राय कर्णस्य कवच-कुण्डलार्षणम्।

(९) मध्यमव्यायोगः-

www.thearyasamaj.org

नाटकमिदम् **एकाङ्कि**। मध्यम-पाण्डवो भीमो मध्यम-नामानं ब्राह्मण-सूनुम् एकं घटोत्कचात् त्रायते। अपत्य-दर्शने भीमस्यानन्दावाप्तिः पत्न्या हिडिम्बया च समागमः।

(१०) प्रतिमानाटकम्-

अङ्कसप्तकमिह। राम-वनवासाद् आरभ्य रावण-वधान्ता कथाऽत्र वर्णिता। दशरथ-प्रतिमां प्रेक्ष्य भरतः पितुर्निधनम् अवगच्छति।

(११) अभिषेकनाटकम्-

अङ्कषट्कमत्र। किष्किन्धा-काण्डाद् आरभ्य युद्धकाण्डान्ता रामकथाऽत्र वर्णिता। रावण-वधानन्तरं रामस्य राज्येऽभिषेकः।

(१२) अविमारकम्-

अङ्कषट्कमत्र। राजकुमारस्य अविमारकस्य राज्ञः कुन्ति-भोजस्य दुहित्रा कुरङ्ग्या सह प्रणय-परिणयोऽत्र वर्णितः।

(१३) चारुदत्तम्-

अङ्क-चतुष्टयमिह। वितीर्ण-विपुल-वित्तेन उदार-चित्तेन चारुदत्तेन सह वसन्तसेना-नाम-वाराङ्गनायाः प्रणयोपमोऽत्र वर्णितः।

नाटकानां प्रणेता भासः-

नाटकानामेतेषां प्रणेता भास एव, अन्यो वेति विविधा प्रतिपत्तिर्विषयेऽस्मिन्। अन्तःसाक्ष्यादिना विज्ञायते यद् भास एवैतेषां नाटकानां प्रणेता। एक एवैतेषां प्रणेतेत्यपि अन्तःसाक्ष्यादिनाऽवगम्यते। तद्यथा-

१. सर्वाणि नाटकानि सूत्रधार-प्रवेशाद् आरभन्ते।

२. नाटक-भूमिकार्थं प्रस्तावना-शब्द-स्थाने **'स्थापना'**-शब्दप्रयोः।

३. नाटकेषु प्ररोचनाभावः, अर्थात् नाटक-कृतः परिचयाभावः स्थापनायाम्।

४. नाटक-पञ्चके स्वप्नवासवदत्तादौ मुद्रालङ्कार-प्रयोगः, अर्थात् प्रथमे श्लोके प्रमुख-नाटकीय-पात्राणां नामोल्लेखः।

५. भरत-वाक्यं प्रायशः सर्वत्र समानमेव। यथा-

'राजसिंहः प्रशास्तु नः।'

६. भूमिका संक्षिप्ततमा। तत्र संसदारम्भेऽपि प्रायः साम्यमेव।

७. पात्रनाम साम्यमपि। यथा- काञ्चुकीयो बादरायणः।

८. अप्रचलित-वृत्तानां प्रयोगो यथा-'सुवदना-दण्डकादयः।'

९. बहुषु नाटकेषु पताका-स्थानकप्रयोगः।

१०. नाटकेषु सर्वेषु भाषा-साम्यं रीति-साम्यञ्च।

११. अपाणिनीय-प्रयोगाः सर्वेषु नाटकेषु।

१२. अन्योन्य-संबद्धानि नाटकानि। यथा-

स्वप्नवासवदत्तम्, प्रतिज्ञायौगन्धरायणस्योत्तरभाग एव।

बाणो हर्षचरिते **'सूत्रधार-कृतारम्भैः'** इति भासनाटक-वैशिष्ट्यम् आचष्टे। तच्च सर्वत्रावाप्यते। राजशेखरोऽभिधत्ते-

भास-नाटकचक्रेऽपि छेकैः क्षिप्ते परीक्षितुम्।
स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः ॥

एतस्माद् भासकृतनाटकबहुत्वस्य स्वप्नवासवदत्तस्य च तत्कृतित्वेनावगतिर्भवति। भोजदेवो रामचन्द्र-गुण-चन्द्रौ च स्वप्नवासवदत्तं भास-कृतिम् आमनन्ति। अतो भास एवैतेषां प्रणेतेत्यवगम्यते। भासस्य जनिकालः ४५० ई. पूर्वादनन्तरं ३७० ई. पूर्वात् प्राक् च स्वीक्रियते।

भासस्य नाट्यकला-

www.thearyasamaj.org

साम्प्रत-कालं यावद् उपलब्धं संस्कृत-वाङ्मयं परीक्ष्यते चेत् भास एव नाटकतामग्रणीरिति शक्यं वक्तुम्। नाटकानां बाहुल्येन, विषय-वैविध्येन, अभिनयोपयोगित्वेन च तस्य नाट्य-नैपुण्यं नाटकनिर्मितौ वैशारद्यं चावधार्यते। नाटकेषु तस्य प्रमुखाः विशेषताः सन्ति-

'भाषायां सरलतया, अकृत्रिमा शैली, वर्णनेषु यथार्थता, चरित्र-चित्रणे वैयक्तिकत्वम्, घटना-संयोजने सौष्ठवम्, कथाप्रसङ्गस्याविच्छिन्नश्च प्रवाहः।'

सर्वाण्येव नाटकानि अभिनयोपयोगीनीति तस्य महनीयताम् अभिवर्धयन्ति। तस्य नाटकेषु मौलिकता कल्पना-वैचित्र्यं च विशेषत उपलभ्येते। स एव एकाङ्कि-नाटकानां जन्मदाता। अस्य नाटकपञ्चकम् एकाङ्कि। पताका-स्थानकमपि मधुरं प्रयुङ्क्ते।

भासोऽनेकेषु नाटकेषु प्रथम-श्लोके मुद्रालङ्कारं प्रयुङ्क्ते। तत्र प्रमुख-नाटकीय-पात्राणामपि श्लेषाश्रयेण नामानि निर्दिश्यन्ते। यथा प्रतिमानाटके नान्दीपाठे राम-सीता-लक्ष्मण-भरत-सुग्रीवादीनां श्लेषेण समावेशः। यथा-

सीताभवः पातु सुमन्त्रतुष्टः,
सुग्रीव-रामः सह लक्ष्मणश्च।
यो रावणार्यप्रतिमश्च देव्या,
विभीषणात्मा भरतोऽनुसर्गम्॥

-प्रतिमानाटकम् १।१

क्वचिद् नाटकीय-पात्राणां संवादोऽपि पद्यबन्धेन भवति। श्लोकस्यैकः पाद एकेन प्रयुज्यते, अपरश्च परेण। भासः चरित्र-चित्रणेऽतिपटुः, तस्य पात्रेषु स्वीयं वैशिष्ट्यम् आलक्ष्यते। तस्य नाटकेषु संवादाः संक्षिप्ताः प्रभावोत्पादकाश्च। सोऽनावश्यकं विस्तारं परिजहाति।

भासस्य शैली[१]-

भासस्य शैल्यां माधुर्यौजःप्रसादानां त्रयाणाम् अपि गुणानां समाहारः समीक्ष्यते। तस्य भाषा सरला, सुबोधा, सरसा, नैसर्गिकी, सप्रवाहा च। उपमा-रूपक-उत्प्रेक्षा-अर्थान्तरन्यासालङ्काराणां प्रयोगो विशेषतोऽवाप्यते तस्य कृतिषु। अनुप्रासादिकं विशेषतः प्रियं तस्य। यथा-

'हा वत्स राम! जगतां नयनाभिराम!।'

-प्रतिमानाटकम् २।४

रामायण-महाभारतादि-प्रभाविता तस्य शैली। अतएव तस्य भाषायां कृत्रिमताया क्लिष्टतायाः क्लिष्ट-कल्पनायाः समासाधिक्यस्य चाभावः संलक्ष्यते, सरलताया सरसतायाश्च समन्वयो निरीक्ष्यते। भासो मानवीय-मनोवृत्तीनां वर्णने आदर्शः। तस्य मनोवैज्ञानिकं विवेचनम् अतीव मनोज्ञम्। यथा-

दुःखं त्यक्तुं बद्धमूलोऽनुरागः,
स्मृत्वा स्मृत्वा याति दुःखं नवत्वम्।
यात्रा त्वेषा यद् विमुच्येह बाष्पं,
प्राप्तानृण्या याति बुद्धिः प्रसादम्॥

-स्वप्नवासवदत्तम् ४।६

भासो भारतीय-भावानां कविः। तस्य नाटकेषु भारतीय-भावानां समीचीनः समन्वयः प्राप्यते। यथा पितृभक्तिः, पातिव्रत्यम्, भ्रातृप्रेम, क्षमा-शीलता, त्यागादिकं च। पातिव्रत्यं वर्ण्यते यथा-

अनुचरति शशाङ्के राहुदोषेऽपि तारा,
पतति च वन-वृक्षे याति भूमिं लता च।

१. विस्तृतविवेचनार्थं द्रष्टव्यम् (लेखकसंपादितस्य प्रतिमानाटकस्य भूमिका) पृष्ठ १९-२६

www.thearyasamaj.org

त्यजति न च करेणुः पङ्कलग्नं गजेन्द्रं,
व्रजतु चरतु धर्मं भर्तृनाथा हि नार्यः॥

-प्रतिमानाटकम् १।२५

भासस्य नाटकानां लोक-प्रियतायाः कारणं वर्तते सरसता, सरलता, रम्यता च। स रसानुकूलामेव भाषां प्रयुङ्क्ते। रसभावानुकूलं शैल्यां परिवर्तनमपि प्राप्यते। यथा शृङ्गारे प्रसादो माधुर्यं च, वीर-रसे ओजो गुणः। यथा जटायुषे क्रुद्धस्य रावणस्योक्तिः-

'मद्भुजाकृष्टनिस्त्रिंश-कृत्तपक्षक्षतच्युतैः।'

-प्रतिमानाटकम् ५।२२

भासो विस्तारमनादृत्य समासं साधीयान् मनुते। यथा- **'कमप्यर्थं चिरं ध्यात्वा...... ...अनुक्त्वैव वनं गताः।'** (प्रतिमा. २।१७)। तथा भावान् चित्रयति यथा ते मूर्तवद् उपतिष्ठन्ते। यथा सन्ध्यावर्णनम्- **'खगा वासोपेताः सलिलमवगाढो मुनिजनः......'**(स्वप्न. १।१६)। राज्याभिषेक-वर्णनम्- **'छत्रं सव्यजनं सनन्दिपटहं भद्रासनं कल्पितं....।'** (प्रतिमानाटकम् १।३)।

भासस्य व्यङ्ग्य-प्रयोगोऽसाधारणो मार्मिकश्च। कैकेयी वने व्याध्री स्यात्। यथा-

वने व्याघ्री च कैकेयी...... (प्रतिमानाटकम् २।८)। व्याकरणादि-वैदग्ध्यमपि प्रदर्शयति यथावसरम्। यथा-

'स्वरपदपरिहीणां हव्यधारामिवाहम्।'

-प्रतिमानाटकम् ५।७

विविधरसवर्णने छन्दः प्रयोगे, अर्थान्तरन्यासप्रयोगे च प्रभूतं दाक्षिण्यम् उपलभ्यते तस्य। एवं नाटकपथ-प्रवर्तकेषु महाकविः भासः सर्वाग्रणीरिति सुकरं वक्तुम्।●

❋प्रसरतु संस्कृत-भाषा❋

-डॉ. अनन्तराममिश्रः 'अनन्तः'

गोला गोकर्णनाथ, खीरी (उ.प्र.)

सुसंस्कृतं भूयान्निखिलं जगदास्ते ममाभिलाषा।

(१)

श्रवण-सुधास्रावकशुभाक्षरा पुरातना निरवद्या,
हृद्या सद्भाविनी मनोज्ञा चम्पू-पद्य-सुगद्या।
समादृता लोकेऽस्मिन् याऽऽस्ते दुर्गुणदोषविनाशा,
ग्रामे ग्रामे नगरे नगरे प्रसरतु संस्कृत-भाषा॥

(२)

संस्कृत-चलनं संस्कृत-वदनं संस्कृत-पठन-पाठनं,
भजतु संस्कृता जीवन-चर्या संस्कृत-धर्म-दर्शनम्।
संस्कृत-साहित्येन सुतृप्ता भवतु ज्ञानपिपासा,
ग्रामे ग्रामे नगरे नगरे प्रसरतु संस्कृत-भाषा॥

(३)

वेद-पुराण-शास्त्र-काव्याङ्गी बहुभाषाणां जननी,
सुविचाराणां पालन-कर्त्री कुविचाराणां हननी।
अपसारयति निराशा-भुवने सञ्चारयति सुभाषा,
ग्रामे ग्रामे नगरे नगरे प्रसरतु संस्कृत-भाषा॥

(४)

अमर-भारती गृहे गृहे न हि मानं यास्यति यावत्,
राष्ट्रैकताऽखण्डता-पूर्णा सुरक्षिता न हि तावत्।
भारतीय-संस्कृति-शकुन्तला-क्रुद्ध-काल-दुर्वासा,
ग्रामे ग्रामे नगरे नगरे प्रसरतु संस्कृत-भाषा॥

www.thearyasamaj.org

उपासनायाः वैदिकं स्वरूपम्(२)

-डॅ. रजनी आत्रेयः
ग्राम जगजीतपुरम्, पोस्ट- कनखलः
हरिद्वारम्- २४९४०८ (उत्तराखण्डः)

अन्यच्च-

'विश्वानि देव सवितर्दुरितानि परासुव।
यद् भद्रं तन्न आसुव॥ (यजुर्वेद ३।३)

अर्थः-

हे **(सवितः)** सकलजगदुत्पादक!, समग्रैश्वर्ययुक्त! **(देव)** शुद्धस्वरूप! सर्वेषां सुखानां दाता परमेश्वर! त्वं कृपया **(नः)** अस्माकं **(विश्वानि)** सम्पूर्णानि **(दुरितानि)** दुर्गुण-दुर्व्यसन-दुःखानि **(परासुव)** दूरं कुरु **(यत्)** ये च **(भद्रम्)** कल्याण-कारकाः गुण-कर्म-स्वभावाः, पदार्थाश्च सन्ति **(तत्)** तान् **(नः)** अस्मान् **(आसुव)** प्रापय।

एषां दुर्गुणादीनां निवारणान्निर्गुणा कल्याणकारि-गुणादीनां लाभाच्च सगुणा प्रार्थना वर्तते।

उपासना-

(१) यथा परमेश्वरस्य गुण-कर्म-स्वभावाः पवित्राः सन्ति, तथाऽऽत्मनोऽपि सम्पादनम् **उपासना** कथ्यते। ईश्वरं सर्वव्यापकमाऽत्मानं च तस्य व्याप्यं ज्ञात्वा, परमेश्वरं समया वयम् अस्मान् निकषा च परमेश्वरोऽस्तीति निश्चित्य योगाभ्यासेन तस्य साक्षात्करणम् 'उपासना' इत्युच्यते। अस्याः फलं ज्ञानस्योन्नत्यादिकमस्ति।

(२) सगुणोपासना-

सर्वैर्गुणैः सहितं परमेश्वरं मत्वा स्वात्मनस्तस्य, तदाज्ञायां च समर्पणं **'सगुणोपासना'** इत्युच्यते।

(३) निर्गुणोपासना-

सर्वैर्दोषैः रहितं परमेश्वरं मत्वा स्वात्मनस्तस्य, तदाज्ञायां च चार्पणं **'निर्गुणोपासना'** इति कथ्यते।

(४) येन परमेश्वरस्यैवानन्द-स्वरूपे स्वात्मनो निमग्नीकरणं भवति, ताम् **'उपासना'** इति कथयन्ति।

(५) रस-गन्ध-शब्द-स्पर्श-रूप-संयोग-वियोग-लघु-गुरु-अविद्या-जन्म-मरण-दुःखादिभिर्गुणैः रहितं परमात्मानं ज्ञात्वा तस्योपासनं **'निर्गुणोपासना'** कथ्यते।

(६) ईश्वरं सर्वज्ञ-सर्वशक्तिमान्-शुद्ध-नित्य-आनन्द-सर्वव्यापक-एक-सनातन-सर्वकर्तृ-सर्वाधार-सर्वस्वामी-सर्वनियन्तृ-सर्वान्तर्यामी-मङ्गलमय-सर्वानन्दप्रद-सर्वपितृ-सर्वजगत्कर्तृ-न्यायकारि-दयालु-प्रभृतिभिः सत्यगुणैर्युक्तं ज्ञात्वा यत् तस्योपासनं क्रियते, सा **'सगुणोपासना'** इति अभिधीयते।

इह सगुण-निर्गुणोपासनाय एवं वैदिकमुदाहरणं प्रस्तूयते-

युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः।
रोचन्ते रोचना दिवि॥ (यजुर्वेदे २३।५)

अर्थः-

(युञ्जन्ति) मोक्षस्य सर्वोत्तमं साधनमुपासना वर्तते। अतो ये विद्वांसः सन्ति, ते सर्वस्मिन् जगति सर्वेषां मनुष्याणां च हृदयेषु व्याप्तं परमेश्वरमुपासनारीत्या

www.thearyasamaj.org

स्वात्मना सह युञ्जन्ति। स ईश्वरः कीदृशोऽस्ति? यत् **(चरन्तम्)** सर्वेषां ज्ञातारम् **(अरुषम्)** हिंसादिदोष-रहितम्, कृपा-समुद्रं **(ब्रध्नम्)** आनन्दानां वर्तितारं, सर्वरीत्या महान्तं परमेश्वरं ज्ञात्वा **(रोचनाः)** उपासकानामाऽऽत्मानं सर्वेभ्योऽविद्यादि-दोषेभ्यः पृथग् भूत्वा **(दिवि)** आत्मनः प्रकाशके परमेश्वरे प्रकाशमयाः भूत्वा **(रोचन्ते)** प्रकाशिता अवतिष्ठन्ते।

अत्र **'अरुषम्'** इत्यनेन पदेन परमेश्वरस्य हिंसादिदोष-रहितत्वान्निर्गुणोपासना, तस्य कृपासागरत्वाच्च सगुणोपासना गृह्यते। तथा च- **'स पर्यगाच्छुक्रमकायमव्रणम्......'** इत्यस्मिन् मन्त्रे परमेश्वरस्य शुक्रादीनि विशेषणानि तस्य सगुणोपासना, अकायादीनि विशेषणानि च निर्गुणोपासनां प्रकाशयन्ति।

उपासनापद्धतिः-

यदा यदा मनुष्यः ईश्वरोपासनां कर्तुं कामयेरंस्तदा तदा स्वेच्छानुकूल एकान्तस्थान उपविश्य, स्वकीयं मनः संशोध्याऽऽत्मानं स्थिरीकुर्युः, सर्वाणीन्द्रियाणि मनश्च सच्चिदानन्दलक्षणवति, अन्तर्यामिनि, सर्व-व्यापके, न्याय-कारिणि सम्यगायोज्य, साधुचिन्तनं विधाय तत्र स्वात्मानं नियुञ्जीरन्। ततः परमेश्वरस्य स्तुतिप्रार्थनोपासनाः पुनः पुनर्विधाय स्वात्मानं यथावत् तत्र संयुक्तं कुर्वीरन्।

अस्या उपासनायाः पद्धतिः पतञ्जलिमुनिकृतं योग-शास्त्रं, तस्य च वेदव्यासमुनिकृतं भाष्यं प्रमाणीकृत्य लिख्यते-

'योगश्चित्तवृत्तिनिरोधः।' इति

अर्थात् चित्तस्य सर्वाः वृत्तीः दुरितेभ्यः पृथग् विधाय शुभ-कर्मसु च स्थिरीकृत्य परमेश्वरस्य सान्निध्येन मोक्षस्य प्राप्तिर्**योग** उच्यते। परमेश्वरात् तदाज्ञापालनाच्च विरुद्धाचरणेन दुरितेषु समाजस्य ततः पृथग्भावो **वियोगः** कथ्यते।

उपासकोऽनेन पूर्वोक्तेन ब्रह्म-शरीरेण कथं ब्रह्म-पुरं प्रविशेदिति विषयेऽस्मिन् महर्षिदयानन्देन ऋग्वेदादिभाष्यभूमिकायां सप्रमाणं प्रतिपादितम्। तदत्र संक्षेपेण निरूप्यते । यथा-

नाविरतो दुश्चरिताद् नाशान्तो नासमाहितः।
नाशान्तमनसो वाऽपि प्रज्ञानेनैनमाप्नुयात् ॥

-कठोपनिषद् २।२४

अर्थः -

अयमुपासना-योगो दुष्टजनस्य न सिध्यति। यतोहि यदा पर्यन्तं मनुष्यो दुष्कर्मभ्यो विनिवृत्य स्वकीयं मनः शान्ताऽऽत्मानं च पुरुषार्थिनं न कुरुते, तथाऽऽन्तरिक-व्यवहारान् शुद्धान् नातनुते, तदा पर्यन्तं स कथयेत् पठेच्छृणुयाच्च तस्य परमेश्वर-प्राप्तिः कदापि न भवितुं शक्नोति।

तपः श्राद्धे ह्युपवसन्त्यरण्ये शान्ता विद्वांसो
भैक्ष्यचर्यां चरन्तः। सूर्य-द्वारेण ते विरजाः
प्रयान्ति यत्राऽमृतः स पुरुषो ह्यव्ययात्मा ॥

-मुण्डकोपनिषद् २।११

अर्थः -

ये मनुष्याः धर्माचरणेन परमेश्वरस्य तस्याऽऽज्ञायां चात्मप्रेमभावेनाऽरण्ये **(हृदय-वने)** स्थैर्येण निवसन्ति, ते वस्तुतः परमेश्वरं निकषा निवसन्ति। ये जना अधर्मस्य परिहाणे धर्माचरणे च दृढाः सन्तो वेदादिसत्यविद्यानां विद्वांसो वर्तन्ते, ये च भिक्षाचर्यादिकं कुर्वन्तः संन्यासाश्रमेऽन्यस्मिन् वाऽऽश्रमे सन्ति, ते सूर्य-द्वारेण (प्राण-द्वारेण) परमेश्वरस्य सत्यराज्ये प्रविश्य विरजाः=सर्वेभ्यो दोषेभ्यो विमुक्ताः सन्तः परमानन्दं मोक्षं प्राप्नुवन्ति। यत्र च ते पूर्ण-पुरुषं सर्वव्यापकं सर्वसूक्ष्मममृतमविनाशिनं, यत्र च हानि-लाभौ

www.thearyasamaj.org

कदाचिन्न भवतः, तं परमेश्वरमुपलभ्य सर्वदाऽऽनन्दे मोदन्ते।

यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद् वाव विजिज्ञासितव्यम्॥ - छान्दोग्योपनिषद् ८।१

अर्थः -

उपासको यदेतैर्योग-साधनैः परमेश्वरस्योपासनां विधाय तत्र प्रवेशं कर्तुं कामयेत, तदा तत्राऽनया रीत्या प्रवेशः कर्तव्यः।

कण्ठस्याधस्तात् द्वयोः स्तनयोर्मध्य उदरस्य चोपरि द्यौ हृदय-देशोऽस्ति, यद् ब्रह्मपुरम् **(परमेश्वरनगरम्)** इति कथयन्ति, तस्य मध्ये यो गर्तः **(गड्ढ़ा इति हिन्दीभाषायाम्)** वर्तते, तत्र कमलाकारं वेश्म **(अवकाश-रूपम्)** एकं स्थान-विशेषं विद्यते। तस्य मध्ये च यः सर्वशक्तिमान् परमात्माऽन्तर्बहिश्चैकरस-भावेन परिपूर्णोऽस्ति, स आनन्द-रूपः परमेश्वरस्तस्य प्रकाशितस्य स्थानस्य मध्ये गवेषणयोपलभ्यते। द्वितीयं तस्योत्तमं प्राप्ति-स्थानं मार्गो वा न विद्यते।

तं चेद् ब्रूयुः, यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः किं तदत्र विद्यते यदन्वेष्टव्यं यद् वाव विजिज्ञासितव्यम्॥ (छान्दोग्योपनिषद् ८।२)

अर्थः -

यदि कोऽपि कदाचिद् पृच्छेत् यद् तस्मिन् हृदयाकाशे किं रक्षितमस्ति, यस्य गवेषणा क्रियते? चेत् तस्योत्तरमिदमस्ति-

स ब्रूयात्, यावान् वाऽयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते, उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ते यच्च नास्ति, सर्वं तदस्मिन् समाहितमिति॥ - छान्दोग्योपनिषद् ८।३

अर्थः -

हृदय-देशं पावनः आकाशोऽस्ति, स सर्वान्तर्यामिना परमेश्वरेणैव परिपूर्णोऽस्ति, तस्यैव च हृदयाकाशस्य मध्ये सूर्यादिनां प्रकाशः, पृथिवी-लोकः, अग्निः, वायुः, सूर्य, चन्द्रः, विद्युत्, सर्वाणि नक्षत्राणि चाऽवस्थितानि सन्ति। यावन्तो दृश्यमाना अदृश्यमाना वा पदार्थाः सन्ति, ते सर्वे तस्यैव सत्ता-मध्ये स्थिरा वर्तन्ते।

तं चेद् ब्रूयुः, अस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि च भूतानि, सर्वे च कामाः, यदेनज्जरा वाप्नोति प्रध्वंसते वा किं ततोऽवशिष्यते॥

-छान्दोग्योपनिषद् ८।४

अर्थः-

अस्मिन् विषये यदि कोऽपि शङ्कते यद् यस्मिन् ब्रह्मणि हृदयाकाशे सर्वाणि भूतानि सर्वे च कामाः स्थिराः सन्ति, तस्य हृदय-देशस्य वार्धक्यस्य पश्चाद् विनाशे सति तस्य मध्ये किमवशिष्यते, यद् यूयं गवेषयितुमुपदिशथ? अस्योत्तरमिदमस्ति-

स ब्रूयात्, नास्य जरयैतज्जीर्यति, न वधेनास्य हन्यते, एतत् सत्यं ब्रह्मपुरमस्मिन् कामाः समाहिताः एष आत्माऽपहतात्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्य-कामः सत्य-सङ्कल्पो यथा ह्येवेह प्रजा अन्वाविशन्ति, यथानुशासनं यमन्तभिकामा भवन्ति, यं जनपदं यं क्षेत्र-भागं तं तमेवा जीवन्ति॥ -छान्दोग्योपनिषद् ८।५

www.thearyasamaj.org

अर्थः -

श्रृणुत भ्रातर! तस्मिन् ब्रह्मपुरे यः परिपूर्णः परमेश्वरोऽस्ति, तस्य न तु कदाचिद् वृद्धावस्था समायाति, न च कदाचिद् तस्य विनाशो जायते, तस्याभिधानं सत्यं ब्रह्मपुरमस्ति। यस्मिंश्च सर्वे कामाः परिपूर्णाः भवन्ति। सः **(अपहत-पाप्मा)** सर्वेभ्यः पापेभ्यो रहितः शुद्ध-स्वभावः **(रजः)** जरावस्था-रहितो निर्जरः **(विशोकः)** शोक-रहितः **(विजिघत्सः, अपिपासः)** अव्यवहार-कामना-शून्यः सत्य-कामः, सत्यसङ्कल्पश्चास्ति। प्रलय-काले तस्मिन्नेवाकाशे सर्वाः प्रजाः प्रविशन्ति। सृष्ट्युत्पत्तिकाले च तस्यैव रचनाः पुनः प्रकाशिताः भवन्ति।

उपासकाः अनेनोपासना-योगेन यस्य कामस्य, देशस्य, क्षेत्र-भागस्य (अवकाशस्य) कामनां कुर्वन्ति, ते तं सर्वं यथावत् प्राप्नुवन्ति (ऋग्वेदादिभाष्यभूमिका-उपासना-विषयः)। अन्यत्र कथितमपि-

समाधिनिर्धूतमलस्य चेतसो,
निदेशितस्यात्मनि यत्सुखं भवेत्।
न शक्यते वर्णयितुं तदा गिरा
स्वयं तदन्तःकरणेन गृह्यते॥

-मैत्रायणी-संहिता ४।४।९

अर्थः -

यस्योपासकस्यानेन समाधियोगेनाविद्यादिकं मलं नष्टं जातम्। यं आत्मस्थो भूत्वा परमात्मनि चित्तं नियुक्तवान्, तस्य परमात्म-योगेन यत् सुखं भवति, तद् वाचा वर्णयितुं न शक्यते। यतो हि, तमानन्दं जीवात्मा स्वयं स्वान्तःकरणेन गृह्णाति। अयं तु मूकाय मिश्रिकाऽऽस्वाद इव वेदितव्यः।●

❁ भगवत्प्रार्थना ❁

-कुलगीतिकातः

(१)

भ्रमन्तं देव ! संसारे सुघोरे पाहि दीनं माम्।
पदाब्जे ते विलोठन्तं द्रुतं संयाहि दीनं माम् ॥

(२)

न भाग्यं तादृशं यत्ते विलोके रूपसौभाग्यम् ।
धिनोति ध्यानसौख्यं मे सुधासंवाहि दीनं माम् ॥

(३)

अविश्रान्तं प्रतीक्षातो नितान्तं श्रान्त-चित्तोऽहम् ।
दयालो दृक्सुधासारैर्नवं निर्माहि दीनं माम् ॥

(४)

श्रुतीनां भूरिभूतीनां विकल्पैर्दिग्भिमूढोऽहम् ।
कथंकारं विलोके त्वां मनागाख्याहि दीनं माम् ॥

(५)

कृपापीयूषलेशार्थं प्रयस्यन् दूयमानोऽम् ।
निलीनं द्वारदेशे ते न प्रत्याख्याहि दीनं माम् ॥

(६)

दयामालम्बते भूमन् ! वटुः (हरिः) कुक्षिं भरिस्तेऽयम्।
इदानीं त्वद्वशोऽहं पाहि मा वा पाहि दीनं माम् ॥

●

www.thearyasamaj.org

❋ आवश्यकताऽऽविष्काराणां जननी भवति ❋

-डॉ. केशवप्रसाद उपाध्यायः

प्रधानाचार्यः

गुरुकुलमहाविद्यालयः ज्वालापुरम्

हरिद्वारम् (उत्तराखण्डम्)

यानि वस्तूनि स्वप्नेऽपि नानुभूतानि, येषां स्वरूपस्य कल्पनाऽपि मानसं नावगाहते स्म। यदि प्रकृत्या तेषामावश्यकता कस्यापि कृते प्रसूयते, तानि वस्तूनि निर्मातुं स प्रवर्तते। अयमेवार्थो विवेच्यतया शीर्ष-स्थाने लिखितस्यास्य प्रबन्ध-विषयस्य।

यदि वयं पुरातन-युगेतिहासेषु दृष्टिं क्षिपामः, यदा सभ्यता-प्रारम्भोऽपि नासीत्, आविष्काराणाम् आवश्यकतामेव प्रसूता इदं स्पष्टमवगच्छामः। तस्मिन् समये मनुष्याः पशुवत् वर्त्तन्तेस्म, पत्रेषु भुञ्जतेस्म, वस्त्राणामुपयोगं नाज्ञासिषुः, वृक्ष-शाखासु कुश-कासादि-सङ्कुलायां वा धरायां अशयिषत। ते अस्त्राणामुपयोगे वह्नि-कार्यं च नाविदन्। परमयं समयोऽपगतः क्रमशस्त एव मानवाः सीतातप-वात्याभ्यः स्वं गोपायितुं गृहस्यावश्यकताम् अनुभवितुमारभन्त। ततश्च गृहनिर्माणप्रक्रिया-मुदभावयन्, एवं वस्त्राणां स्थाने पशूनां चर्माणि समुपायुज्यत।

यदा च मनुष्याः परेभ्यः स्वस्य रक्षाया आवश्यकता मनसि विविदुः। भोजनार्थं पशूनां मांसं चापेक्षितवन्तस्तदनन्तरं प्रस्तर-खण्डानि तेष्वेव संघृष्य नाना-विधानि शस्त्राण्यस्त्राणि च निरमायिषु-र्यैर्भेदनच्छेदनादि-कार्यं सुकरं समपद्यत। कतिचित् सराणि चामयासमश्नतां तेषां जाते मुख-वैरस्ये ते पाक-क्रियाया आवश्यकतां निरधारयन्, यतस्ते पाक-प्रक्रियामनुसमधिषत।

उपर्युक्ताद् विवरणादिदमवधार्यते, किमपि वस्तु बलादिवाविष्कारयति। एवं हि वस्तुस्थितः कोऽपि किमपि वस्तुं विना कस्याञ्चित् कठिनायां स्थितौ पतति, न चोपलभते प्रतिकारपथम् विमनायते च तदनुपलब्ध्या, ततः कञ्चनोपायं तत्प्रतीकारस्य सर्वात्मना चिन्तयति लभते च तदुपाया एवाविष्कार-स्वरूपतया परिणमन्ते।

यदि मनुष्यः कश्चित् सर्वमपि मनोभिलषितं वस्तु सद्य एवाधिगच्छेत्, न प्रतिबद्धमनोरथतया खिद्येत। किमर्थं स व्याप्रियेत चेतसि, कुतश्च निर्गच्छेयुर्नवाः पदार्थाः। परमत्र प्रतिक्षणं नूतनतामर्थयमाने जगति केवलं भोजनेनाच्छादनेनैव च मानवस्य तृष्णा नोपशाम्यति। स किमप्यन्यदपि कामयते, तदर्थमपि तस्य बुद्धिर्व्याप्रियते, ततोऽपि च बहव आविष्कारा जन्म लभन्ते।

अत्र जगति बहव ईदृशा अपि सन्ति पदार्थाः येषामाविष्कारा नावश्यकतापारवश्यकृतः, यथा वाष्पशक्तिविद्युदादिकाः पदार्थाः, तानन्तरापि मनुष्याणां जीवनं न प्रत्यवध्यत। एवं च आविष्कारा आवश्यकताभिरेव जन्यन्त इति रिक्तवचः इति श्रुवतः प्रतिवक्तव्यं यतः मानवानामावश्यकता न केवलं कायिक्य एव भवन्ति, ते मानसिक-भोजनं लब्धुं प्रयतन्ते। जातेऽपि जीवन-धारणोपाये मानसिकं तद् भोजनं च तदीयाविरतबुद्धिव्यापार-प्रभावेण समुपह्रियते, व्याप्रियन्ते, तदाऽऽविष्कारा जन्म गृह्णन्ति, शब्द-प्रसारणयन्त्रम्, वायुयानम्, तडित्पत्रम् इत्यादय एवं प्रकारा एव।

www.thearyasamaj.org

एवं हि श्रूयते कुत्रापि पर्वत-शिखरे समासीन: एक: काक: पिपासा-क्षामकण्ठो भूमौ विवरे जलमपश्यत्, पर्वत-शिखराच्च भुवमवतार परं भुवि समवतीर्णस्यापि तस्य विवरस्थं जलं पातुं शक्तिर्नाभवत्। पिपासया पीडितश्च स इतस्तत: पश्यन्नपि किमपि वर्त्म नाद्राक्षीत्। जलं विना शुष्यदाननविवरस्य तस्य मनस्येक उपाय: स्फुरति स्म। तत्र वर्तमानानि लघूनि प्रस्तर-खण्डानि चञ्चुपुटेनादाय विले क्षप्तुमारभत, तेन विले भृते तत्रत्यं जलं बहिरभवत्। स काक: स्वां पिपासां शमितवान्।

दृश्यतामत्र कथायामाविष्कार: कथमावश्यकता-बाधितेन काकेन व्यधीयत। यदि पक्षिषु एतादृशी स्थिति:, का कथा पुरुषाणाम्? '**थोमस एडिसन**' महोदय: कियतांशेन बधिरोऽत: शब्दव्यापारान्वेषणप्रवृत्तश्चासीत्। अनुसन्धान-प्रवृत्तेनैव तेन '**फोनोग्राफ**' नामकं यन्त्रमाविष्कृतं यदधुना प्रतिपल्लब्धसञ्चारम् अस्माकमेव देशस्यालङ्कार: श्रीमान् इन्दुमाधवमलिकमहोदय: स्वयं प्रवाहिकया पीडित आसीत्, स सुपचं भोजनं पक्तुं प्रकारमनुसन्दधान एकं यन्त्रमाविष्कृतवान्। यदधुना जना: '**कुकर**' इति नाम्ना व्यवहरन्ति।

एतावता समर्थितं साधु तथ्यमिदं यद् यदा कापि परमावश्यता पुमांसं व्याकुलयति, तदा तदीया मतिर्न विश्राममधिगच्छति। अविश्रान्तं व्याप्रियमाणा च समति: सुप्तां स्वां शक्तिमुद्बोधयति। तत्प्रभावेणैव चालसा: सव्यापारा: दुर्बला बलवन्त: अविचारका: विचार-चतुराश्च सम्पद्यन्ते। जगत: सर्वोऽपि व्यापार आवश्यकता-प्रसूत एव। यद्यावश्यकता दिनानुदिनं नैधेत, यथावस्थितमिदं जगत् पदमपि पुरतो न स्पन्देत। प्रतिदिनं वर्धमाना जनसंख्याऽऽवश्यकतां वर्द्धयन्ती संहार-कराण्यस्त्राण्यपि समुत्पादयति। अत: केनापि साधुसमर्थितमिदं यद्-

आविष्कारा आवश्यकतया जन्यन्ते।

●

❋ अभ्यर्थना ❋

कुलगीतिकात: साभारम्।

(१)

अये ! कामये नाथ ! किञ्चिद् दृशन्ते ।
क्षणं देहि दीनेऽनुकम्पालवन्ते ॥

(२)

अहो मे बहो: कालतो लालसेयम् ।
कदाऽऽलोकयेयं पदाम्भोरुहन्ते ॥

(३)

क्षणं वीक्ष्यतां देव ! दीना दशा मे ।
धरायां विलोठामि हा सम्मुखन्ते ॥

(४)

चिरं चिन्तया किन्तयाऽहं न जाने ।
प्रभो हन्ति या दीनमेनं जनं ते ॥

(५)

विभो ! भासि सर्वस्य चित्तांतराले ।
किमालेखये दु:खमेताच्चिरन्ते ॥

(६)

बलं धर्मकर्मादि केषाञ्चन स्यात् ।
अलं केवलं मेऽनुकम्पाबलन्ते ॥

(७)

लभेताते ऽऽञ्जसा मूढचेता नु मादृग् ।
लभन्ते बुधा: संविदन्ते पदन्ते ॥

(८)

अहं पातकी ख्यातकीर्तिर्जनानाम् ।
परं किं दयाब्धेर्दयाया लवं ते ॥

www.thearyasamaj.org

❋ वर्तमानयुगे गुरुकुलशिक्षाप्रणाल्याः प्रासङ्गिकता ❋

-डॉ. हरिगोपालः शास्त्री
कुलपतिः
गुरुकुलमहाविद्यालयः, ज्वालापुरम्
(हरिद्वारम्)

सम्प्रति आलोच्यते सैव गुरुकुलशिक्षाप्रणाली। तदानीन्तनाः जनाः इदानीन्तनाः जनाः वा सन्ति समाना एव प्रमुखतया गुरुकुलेषु? गुरूणां कुलानि आर्यधर्मपराणि सन्ति न वा साम्प्रतम्? मातृदेवत्वं, पितृदेवत्वं, आचार्यदेवत्वञ्च कीदृक्रूपेण सम्प्रति व्यवह्रियते? सत्यवादिता, धर्माचरणम्, स्वाध्यायशीलता कीदृशी तत्र दृश्यते गुरुकुलेषु। अत्रैतदपि परिशीलनीयम् यत् कीदृञ्जीवनाचाराः गुरुकुलशिक्षाम्? ईदृशैरेव प्रश्नैः समालोच्यते यत् कीदृशोऽद्य सञ्जातोऽस्माकं समाजः। अत्रोच्यतेऽस्माभिः।

यद्यस्माकं समाजः वाल्मीकिरामायणम्, महाभारतञ्च प्रमाणयति तर्हि भगवान् वेदव्यासो निर्णयति-

कालो वा कारणं राज्ञः राजा वा कालकारणम्।
अत्र ते संशयो मा भूत् राजा कालस्य कारणम्॥

आस्माकोऽपि मन्तव्यः '**गुरूणामेव तज्जाड्यं यत्र शिष्याः निरङ्कुशाः**'। यदद्यत्वे भद्रलोकः पशुलोकेन आक्रम्यते तदत्र कोऽस्ति दोषी? विचार्यताम्- '**तेजोऽसि, अमृतमसि, धामनामासि, प्रियं देवानाममृतं**

एषा वर्ततेऽस्माकं आर्याणामवधारणा। एष आर्यसिद्धान्त एतादवगन्तुं प्रचाल्यते, यत् मनोः सन्ततिनिर्माणं, पालनं प्रशासनञ्च गुरूणामेवाधीनं भवति भवितव्यश्च। गुरुर्यथा प्रकल्पते शिष्यव्यक्तित्वं तथैवोपजायते। वशिष्ठ-विश्वामित्र-अगस्त्यादिभिर्यत्कल्पितस्तथैव श्रीरामचन्द्रस्य जीवनवृत्तान्त प्रत्यपद्यत। एनमेव सिद्धान्तं समस्तमेव आर्यवाङ्मयं अनुसरति। ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासजीवनप्रवर्तनमित एव प्रारभत, यदद्यापि भारतीयैः पाल्यते वैदेशिकैर्दार्शनिकैश्च सुतरां प्रशंस्यते। एतस्याः जीवनपद्धत्या एव संरक्षणार्थं गुरुकुलशिक्षा-प्रणाली प्रवर्तते।

गुरुकुलशिक्षाप्रणाल्यनुसारं विद्यार्थी सङ्गमे वा नदीनां, रमणीये वा उपवाटिकानां स्थलेषु जीवनशिक्षार्थं गुरून् उपगत्य, सब्रह्मचर्यं ज्ञान-विज्ञानशिक्षामाददति। तत्र प्रथमा शिक्षा '**मातृदेवो भव**', '**पितृदेवो भव**', '**आचार्यदेवो भव**' इति भवति। '**सत्यं वद**', '**धर्मं चर**', '**स्वाध्यायान्मा प्रमदः**' इति द्वितीया शिक्षा। एतादृग्भिरेव पाठैः विद्यार्थी भवति विद्वान्, विचारवान्, राष्ट्रधर्मवान्।

www.thearyasamaj.org

देवयजनमसि।' इत्यादि विशेषणविशिष्टं दुग्ध-दधि-नवनीतं-घृतमिति नामवस्त्वपि नरकलङ्कैः दोषीकृत्य निर्भयं विक्रीयते, येन आबालवृद्धं परिवारसमूहं रोगाक्रान्तं भवत् वर्तते। परमघृणितपदार्था अपि निर्दोषलोकानां भोज्यविषयतामानीयन्ते। ब्रह्मचर्य-प्रधानेष्वपि विद्यानिकेतनेषु उत्तरोत्तरं चारित्र्यपतनं भवदस्ति। जनसेवाव्याजेन जनधनं लोलुप्यते। धूर्तध्युर्य्याः शुभपदेषु स्थाप्यन्ते। साधवः सज्जनाश्च तिरक्रियन्ते। राष्ट्ररक्षणसदृशेष्वपि पदेषु कितवता प्रविष्टा। उपदा-उक्तोचादीनान्तु निर्भयं साम्राज्यं चलति। उच्चपदस्थोऽपि जनः परमनीचतामाचरन् न लज्जते अपितु पुष्पमालादीनां पात्रतामानीयते। कदाचित्तु कथञ्चिद् गुरवोऽपि छात्रकितवतामाचरन्ति।

यदि सर्वा एव शिक्षण-प्रशिक्षण-संस्थाः धनोपार्जनदृष्टिकोणेनैव स्थाप्यन्ते, अथ च ताः धनोपार्जनप्रशिक्षणमेव ददति, तर्हि को नाम विद्यालयो विश्वविद्यालयो वा भद्रजनान् राष्ट्रगौरवरक्षकान् नागरिकान् निर्मास्यति? यदि सर्वकारः, लोकसमाजः, उदात्तचरितः कश्चिदपि स्थितिमेनां न समालोचयति, तर्हि भारतीयनरत्वं वानरत्वं वा केन प्रकारेण विश्लेषयिष्यते?

गुरुकुलशिक्षाप्रणालीवैक्लव्यं नितरां राष्ट्रनिष्ठाणां महापुरुषाणामवधानं अपेक्षते। अनास्थावत्यामस्यां स्थितौ पुरुषपुङ्गवैर्बह्वस्ति कर्तव्यम्। इति दिक्।●

ऋषिदयानन्दः

-आचार्यसन्दीपकुमारत्यागी 'दीपः'
योगविभागाध्यक्षः
जार्जियन औरेंजविल कालेज,
टोरण्टो (कनाडा)

(१)

शिवालयं शिवरात्रौ दर्शनाय शङ्करस्य,
मूलशङ्करो जगाम सह परिवारेण।
निशीथे प्रसुप्ताः सर्वे नास्वपीत् स व्रतधारी,
आश्चर्यचकितोऽभूत् आखूनां प्रवेशेन॥
शिवलिङ्गोपरि यदा अक्षतानि भक्षितानि,
त्यक्तानि मलमूत्राणि तैस्तास्य जड़त्वेन।
तदा तस्य बालकस्य हृदि जातो विचारोऽयम्,
शिवोऽयमसत्यमस्ति गुणेन, स्वभावेन॥

(२)

ततश्च विहाय गृहं सच्छिवस्यान्वेषणार्थम्,
बभ्राम स तीर्थे-तीर्थे शैलेषु वने-वने।
स्वोद्देश्यमपूर्णं ज्ञात्वा प्रविश्य संन्यासाश्रमे,
सांसारिक-सर्वभोगान् त्यक्त्वा पूर्णयौवने॥
गुरुविरजानन्दस्यादेशं पालयितुं पपौ,
हालाहलं दयानन्दोऽनेकदा स्वजीवने।
तस्योपदेशमासीद्यादीश्वरः सदा रमते,
कणे-कणे, जने-जने विजने त्रिभुवने॥

●

www.thearyasamaj.org

दिल्ली-नगरे पञ्चदशं विश्वसंस्कृत-सम्मेलनं समायोजितम्

-डॉ. प्रकाशचन्द्रपन्तः, भारतोदय-संवाददाता
सहायकाचार्यः शिक्षशास्त्रविभागे
उत्तराखण्ड-संस्कृत-विश्वविद्यालयः
हरिद्वारम् (उत्तराखण्डम्)

अन्ताराष्ट्रिय-संस्कृत-स्वाध्याय-संघस्य, राष्ट्रिय-संस्कृत-संस्थानस्य च संयुक्त-तत्त्वावधाने समायोजितस्य **विश्व-संस्कृत-सम्मेलनस्य** शुभारम्भः नवदेहलीस्थे विज्ञान-भवने ०५.०१.२०१२ तमे दिनाङ्के भारतस्य प्रधानमन्त्रिणा डा. मनमोहनसिंहमहोदयेन कृतः। प्रधामन्त्री मनमोहनसिंहः कार्यक्रमस्य मुख्यातिथिः आसीत्। कार्यक्रमस्याध्यक्षः भारत-सर्वकारस्य मानव-संसाधन-विकास-मन्त्री माननीयः श्रीकपिलसिब्बल-महोदयः आसीत्। प्रातः दशवादने दीप-प्रज्वालनेन कार्यक्रमस्य शुभारम्भो जातः।

स्वागत-भाषणं कुर्वन् राष्ट्रिय-संस्कृत-संस्थानस्य पूर्वकुलपतिः संस्कृत-विद्वान् प्रो.वेम्पटिकुटुम्बशास्त्री उक्तवान् यत् **भारतस्य प्रधामन्त्री श्रीमनमोहनसिंहः** संस्कृतानुरागी अस्ति। व्यस्तकार्यक्रमेभ्यः संस्कृत-कार्यक्रमाय समयं प्रदाय तेन स्वीयः संस्कृतानुरागः प्रदर्शितः। प्रो.वी.कुटुम्बशास्त्री सर्वेषां समागतानां विदुषां संस्कृत-विदुषीनाञ्च स्वागतं प्रकटितवान्।

भारतस्य प्रधानमन्त्री डा. मनमोहनसिंहः स्वीये उद्बोधने सर्व-प्रथमम् अवदत् यत् **"संस्कृतं भारतस्य आत्मा अस्ति। संस्कृतं विना भारतस्य सांस्कृतिकं साहित्यिकम् अस्तित्वं वक्तुं नैव शक्यते।"** प्रधानमन्त्री उक्तवान् यत् संस्कृत-वाङ्मये एव सम्पूर्णं विश्वं कुटुम्बम् इति वर्णयन्तः भावाः विद्यन्ते। तेनोक्तं यत् संस्कृत-भाषायाः अध्ययनेन भेद-भावः समाप्तः भवति। आयुर्वेदस्य प्रसिद्धलेखकानां चरक-सुश्रुत-वाग्भटप्रभृतीनां नामोच्चारणं कुर्वता प्रधानमन्त्रिणा उक्तं यत् भारतस्य सर्वमपि ज्ञानं विज्ञानं संस्कृते एव वर्तते। आर्यभट्ट-वराहमिहिरादयः संस्कृतज्ञाः वैज्ञानिकाः भारते बभूवुरिति। संस्कृतस्य प्रशंसां कुर्वन् डा.मनमोहनसिंहः सर्वेषां समागतानां विदुषां स्वागतं कृतवान्। डॉ.मनमोहनसिंहः राष्ट्रिय-संस्कृत-संस्थानस्य प्रकाशितानां पुस्तकानां लोकार्पणमपि कृतवान्।

अध्यक्षीयोद्बोधने राष्ट्रिय-संस्कृत-संस्थानस्याध्यक्षाः मानव-संसाधन-विकास-मन्त्री (भारत-शासनम्) श्रीकपिलसिब्बलः उक्तवान् यत् संस्कृत-भाषा प्राचीना एव भाषा नास्ति। इयं तु अर्वाचीना व्यावहारिकी भाषापि वर्तते। सङ्गणकादि-प्रयोगेषु संस्कृतस्योपयोगितां वर्णयता श्रीकपिलसिब्बल-महोदयेनोक्तं यत् संस्कृतमद्य विश्वस्य विविध-देशेभ्यः समागताः जनाः तस्यैव प्रमाणं सन्ति। श्रीकपिल-सिब्बलः उक्तवान् यत् संस्कृत-साहित्यं समृद्धम् अस्ति। तद् जनान् परस्परं योजयति, सामाजिकभेदान् अपाकरोति। तेनोक्तं यत्

www.thearyasamaj.org

एतदस्माकं सौभाग्यं यत् विश्व-संस्कृत-सम्मेलनं भारते दिल्ली-नगरे भवति। सिब्बलः उक्तवान् यत् मलेशिया-देशे राष्ट्रिय-स्तरे अन्य-भाषाः इव संस्कृतम् अपि पाठ्यते। इंग्लैण्ड-देशे विद्यालयेषु संस्कृतं पाठ्यते। अनेनैव संस्कृतस्य लोकप्रियत्त्वं स्पष्टं भवति।

धन्यवाद-ज्ञापनं कुर्वन् संस्थानस्य कुलपतिः प्रो. राधावल्लभ-त्रिपाठी उक्तवान् यत् संस्थानं स्वीयैः एकादश-परिसरैः समन्वितम् एकं लघुभारतमिव राजते। प्रो.राधावल्लभत्रिपाठीमहोदयः विश्वसंस्कृतसम्मेलनाय सम्यक् आर्थिकानुदानं दत्तवद्भ्यो मानव-संसाधन-विकास-मन्त्रालयस्य अधिकारिभ्यः कर्मचारिभ्यश्च तथैव भारतस्य प्रधामन्त्रि-वर्येभ्यः, कपिलसिब्बलवर्येभ्यः, समागतेभ्यः सर्वेभ्यः विद्वद्भ्यश्च धन्यवादान् समर्पयत्।

कार्यक्रमे मानव-संसाधन-विकास-मन्त्रालयस्य सचिवा विभापुरीदाससहिताः अनेके गणमान्याः विद्वांसः विदुष्यश्चोपस्थिताः आसन्। येषु संस्कृतस्य पितामहः प्रो. रामकरणशर्मावर्यः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतिः, प्रो. अभिराजराजेन्द्रमिश्रः सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य कुलपतिचरः, प्रो. आर. देवनाथमहोदयः (कुलपतिः राजस्थान-संस्कृतविश्वविद्यालयस्य) डॉ. सुधारानी पाण्डेयः (कुलपतिः, उत्तराखण्डसंस्कृत-विश्वविद्यालयस्य), प्रो. सत्यव्रत-शास्त्री कुलपतिचरः, श्रीचमूकृष्णशास्त्री (संस्कृतभारती), डा. रमाकान्तशुक्लः, प्रो. पुष्पादीक्षितः, प्रो. एम. चन्द्रशेखरः, डा. हरेकृष्णशतपथी, डा. बुद्धदेवशर्मा (सचिवः, उत्तराखण्डसंस्कृतअकादमी), डा. अरविन्द-नारायणमिश्रः (उत्तराखण्डसंस्कृतविश्वविद्यालयस्य), डॉ.प्रकाशचन्द्रपन्तः (उत्तराखण्डसंस्कृतविश्वविद्यालस्य), काशुनोरी हिरानो (जापानतः), लोकेशचन्द्र-प्रभृतयः नैके विद्वांसः समुपस्थिताः आसन्।

कार्यक्रमे ३२देशानां १५०० जनाः प्रतिभागं कृतवन्तः। कार्यक्रमस्य सञ्चालनं संस्कृतभाषायां डा. रत्नमोहनझामहोदयेन कृतम्। इतः पूर्वं चतुर्थे (४.१.२०१२) दिनाङ्के इन्दिरागान्धीराष्ट्रियकलाकेन्द्रे, नवदेहल्यां सायं द्विवादनतः पूर्वरङ्गः आसीत्। तत्र नाट्यशास्त्रानुसारं सर्वेऽपि कार्यक्रमाः समायोजिताः। ते च कार्यक्रमाः अद्भुताः अनुकरणीयाश्चासन्। ततः पूर्वं चतुर्णां वेदानाम् आचार्याणां द्वारा वैदिकं मङ्गलाचरणं विहितम्। तस्य संयोजकः डा. रूपकिशोरशास्त्री आसीत्।

तदैव सायं ५.३० वादने दिल्लीसर्वकारस्य मन्त्रिणा श्रीमता रमाकान्तगोस्वामिना पुस्तकमेलायाः उद्घाटनं विहितम्। अवसरेऽस्मिन् गोस्वामी-महोदयः उक्तवान् यत् संस्कृत-भाषां तावन्ति पुस्तकानि रच्यन्ते यत् जनः प्रत्यहं नवीनं पठितुं शक्नोति। तेनोक्तं यत् विंशतितमं विश्वसंस्कृतसम्मेलनं पुनः भारते भवतु, विश्व-संस्कृत-पुस्तक-मेला चापि पुनः भारतस्यैव राजधान्यां दिल्ल्यां समायोजनीया। एवमेव सः सर्वेषां संस्कृतानुरागिणां स्वागताभिनन्दनं च व्याहरत्।

तत्र चोत्तराखण्ड-संस्कृत-विश्वविद्यालयस्य संस्कृत-अकादम्याश्च वसाफलके स्थापिते आस्ताम्। सम्मेलने पञ्चदशाधिकस्थानेषु विविधविषयाणां सत्राणि प्राचलन्। तत्र भारतीयैः वैदेशिकैश्च विद्वद्भिः गणेषणा-पराणि शोध-पत्राणि प्रस्तुतानि। विज्ञानभवनस्य सर्वेषु सभागारेषु किमपि विशिष्टमेव चित्रं दृश्यते स्म। सर्वे

www.thearyasamaj.org

परस्परं मुदा संस्कृतम् आंग्लभाषां च व्यवहरन्तः सानन्दम् इतस्ततः अटन्तः दृश्यन्ते स्म।

शोध-पत्राणां वाचनेन सह श्रोतारः तत्रैव प्रश्नान् पृच्छन्ति स्म। प्रायशः विंशतिः निमेषान् यावत् एको जनः नैजं शोध-पत्रं पठतिस्म। पूर्वतः निर्धारितविषयाणां पञ्जीकृतानामेव जनानां विदुषां शोधपत्राणि स्वीकृतानि, नान्येषाम्।

सायंकाले प्रतिदिनमेव विशिष्टानि नाटकानि अभिनीयन्ते स्म, तेषु पी.सी. मुरली माधवन-महोदयस्य निर्देशने **'कुट्टियाट्टम्'** इति आश्चर्यचूडामणिः वस्तुतः आश्चर्यकरम्। नवमे दिनाङ्के दशमे दिनाङ्के च **संस्कृतकविसम्मेलनम**पि समायोजितम् आसीत्। तत्र देशस्य विदेशानां च संस्कृतकवयः कवितापाठद्वारा श्रोतॄणां मनांसि अरञ्जयन्। कविषु कविचक्रवर्ती डा. अभिराजराजेन्द्रमिश्रः, डा. सत्यव्रतशास्त्री, देवर्षि-कलानाथशास्त्री, प्रो. वेम्पटिकुटुम्बशास्त्री, प्रो. राधावल्लभत्रिपाठी, डा. इच्छारामद्विवेदी, डा. जनार्दनप्रसादपाण्डेयः 'मणिः', डा. रामकरणशर्मा(संस्कृतस्य भीष्मपितामहः इति प्रसिद्धः विद्वान्), डा. पुष्पादीक्षितः प्रभृतयः नैके कवयः प्रमुखाः आसन्।

एवं पञ्चदशं **विश्वसंस्कृतसम्मेलनं** नूनमेव भारत-भुवि अद्वितीयम् अद्भुतम् अनुकरणीयं प्रशंनीयञ्च जातम्। वस्तुतः सम्पूर्ण-विश्वस्य दर्शनं दिल्लीस्थे विज्ञान-भवने सञ्जातम्। अस्तु, अनेन सहैव इदमपि ज्ञातव्यं वर्तते यद् षोडशं विश्व-संस्कृत-सम्मेलनं बैंकाक-नगरे भविष्यतीति सम्मेलन-सचिवेन संसूचितम्।●

❋ वेद-विद्या-स्तवः ❋

कुलगीतामालातः साभारम्

हे देवि! वेदविद्ये! भगवतीं वयं नमामः।

(१)

माता:प्रसूतिरेषा, जगतो विचित्रवेषा॥
जगता भवत्सकाशादिति ते पदे श्रयामः॥
हे देवि........................॥

(२)

असवश्चिरन्तनानां, वसवः पुराभवानाम्।
अमरर्षिमानुषाणां, भवतीमिति स्मरामः॥
हे देवि........................॥

(३)

जगतां त्वमेव सारं, हततुङ्गपङ्कभारम्।
दधतीं महोपकारं, शरणं वयं प्रयामः॥
हे देवि........................॥

(४)

मुनिमूलशङ्करं तं, तव मूलकूलहेतोः।
विषमं विषं निपीय, त्रिदिवं गतं भजामः॥
हे देवि........................॥

(५)

तव चित्मृक्चयानामविकल्पिताशयनाम्।
पारे गिरां महत्वं, बहुशो वयं गृणामः॥
हे देवि........................॥

(६)

जगती तमोमयी स्यात्, भवती न भामती चेत्।
अयि वेदवाणि! वाणी किमु ते नु वर्णयामः॥
हे देवि........................॥●

www.thearyasamaj.org

❋ महाविद्यालय–समाचाराः ❋

ज्वालापुरीय–गुरुकुलमहाविद्यालयस्य प्राध्यापकः हिन्दीसाहित्यकारश्च सुशीलकुमारत्यागी–महोदयः '**बिहारी सतसई के पद्मसिंह शर्मा कृत सञ्जीवनभाष्य का अनुशीलन**'इत्यस्मिन् विषये डॉ. भीमरावअम्बेडकरविश्वविद्यालय–आगरातः शोधकार्यं

THE CHANCELLOR & GOVERNOR SHRI B.L. JOSHI

कृतवान्। शोधकार्यमिदं बी.डी.एम.म्यु. कन्या पी.जी.कॉलेज–शिकोहाबादस्य हिन्दीविभागस्य एसोसिएट प्रोफेसर डॉ. श्रीमतीबृजेशभारद्वाजस्य निर्देशने पूर्णं सञ्जातम्।

पी–एच. डी. (विद्यावारिधिः) शोधोपाधिः डॉ. भीमरावअम्बेडकरविश्वविद्यालय–आगरायाः ७७तमे दीक्षान्तसमारोहस्यावसरे ५ नवम्बर २०११ तमे दिनाङ्के उत्तरप्रदेशस्य महामहिमराज्यपालः कुलाधिपतिश्च श्री बी.एल.जोशी, भारतस्य सर्वोच्चन्यायालयस्य माननीयन्यायाधीशः श्रीस्वतन्त्रकुमारः, कुलपतिः प्रो. डी.एन. जौहरः, कुलसचिवश्रीअशोककुमार 'अरविन्द' द्वारा सुशीलकुमारत्यागी ज्वालापुरीय–गुरुकुल–महाविद्यालयस्य हिन्दी–प्राध्यापकाय प्रदत्तम्।

सुशीलकुमारत्यागी–महोदयेनावसरेऽस्मिन् उक्तं यत् श्री पं. पद्मसिंहशर्मा हिन्दीसाहित्यस्य मूर्धन्य–विद्वान्, हिन्दीसाहित्ये तुलनात्मकपद्धत्याः जनकः, गुरुकुलकाङ्गड़ीविश्वविद्यालयस्य ज्वालापुरीय–गुरुकुल–महाविद्यालयस्य च प्रारम्भिक–स्तम्भेषु अन्यतमः आसीत्। तस्य जन्म १८७६तमे वर्षे **बिजनौर** जनपदीय–**नायकनगला**–नामाख्ये ग्रामेऽभवत्, तस्य निधनं चापि १९३२तमे वर्षे बभूव।

अवसरेऽस्मिन् गुरुकुलज्वालापुरस्य कुलपतिः डॉ. हरिगोपालशास्त्री, मुख्याधिष्ठाता डॉ. यशवन्तसिंहः, प्राचार्यः डॉ. केशवप्रसादोपाध्यायः कुलसचिवः डॉ. अजयकौशिकः, श्री कृष्णलालदिवानः, श्रीगोपीरमणझा, डॉ. सुरेशचन्द्रत्यागी, डॉ. संजयकुमारत्यागी, श्रीअसीमकुमारः, आचार्यअजयकुमारत्यागी(कनाडा), आचार्यसन्दीपकुमारत्यागी 'दीपः' (कनाडा), डॉ.प्रकाशचन्द्रजोशी, रजतबहुखण्डी, सुरेशचरणपन्तादयः महानुभावैः सुशीलकुमारत्यागी'अमित'–नामानं प्राध्यापकं पी–एच.डी.(विद्यावारिधिः) उपाधि प्राप्ते सति शुभकामनाः प्रदत्ताः।●

www.thearyasamaj.org

भारत-वन्दना

वन्दे मातरम्!

सुजलां सुफलां मलयजशीतलां
शस्यश्यामलां मातरम्॥
वन्दे मातरम्॥

(१)

शुभ्रज्योत्स्नां पुलकितयामिनीं।
फुल्ल - कुसुमित - द्रुमदल - शोभिनीम्,
सुहासिनीं सुमधुरभाषिणीम्,
सुखदां वरदां मातरम्॥
वन्दे मातरम्॥

(२)

त्रिंशकोटि - कंठ - कलकल - निनाद - कराले,
द्वित्रिंशकोटि - भुजैर्धृत - खरकरवाले,
के बोले माँ तुमि अबले?
बहुबलधारिणीं नमामि तारिणीम्,
रिपुदल-वारिणीं मातरम्॥
वन्दे मातरम्॥

(३)

नमामि कमलां अमलां अतुलाम्,
सुजलां सुफलां मातरम्॥
वन्दे मातरम्॥

(४)

श्यामलां सरलां सुस्मितां भूषिताम्,
धरणीं भरणीं मातरम्!
वन्दे मातरम्!

हरिद्वार-स्थितस्य ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्
भारतोदयः (संस्कृत-मासिकम्)
P.O. गुरुकुलकाङ्गड़ी २४९४०४
हरिद्वारम् (उत्तराखण्डम्)
सेवायाम्,
श्री........

मा ब्रूहि दीनं वचः

रे रे चातक! सावधानमनसा मित्र! क्षणं श्रूयता-
मम्भोदा बहवो वसन्ति गगने सर्वेऽपि नैतादृशाः।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः॥

भावार्थः-

यथा चातकैराकाशे मेघ-मात्रं दृष्ट्वा जलं न प्रार्थनीयं, यतोहि केषुचिन्मेघेषु जलं भवति, केचिद्य व्यर्थमेव गर्जनं कुर्वन्ति, न तु वर्षणम्। तथैव याचकैरपि धनाशयाः यः कोऽपि दाता नार्थयितव्यः, परीक्ष्यैव स्वाभिप्रायः प्रकाशनीय इति।

-नीतिशतकम् ५१

मुद्रकेण, प्रकाशकेन डॉ. हरिगोपालशास्त्रिणा ज्वालापुर-स्थिते 'न्यू जे.एन. स्टेशनरी मार्ट' नामके मुद्रणालये मुद्रापयित्वा 'भारतोदयः' मासिकं पत्रं प्रकाश्यं नीतं हरिद्वार-स्थितया ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभया। सम्पादकः डॉ. हरिगोपालशास्त्री